यथा,—
अर्काद्विनि:सृत: प्राचीं यद्यात्यहरह: शशी।
भागैर्द्वादशभिस्तत् स्यात्तिथिश्चान्द्रमसं दिनम्॥
त्रिंशांशकस्तथा राशेर्भाग इत्यभिधीयते।
आदित्याद्विप्रकृष्टस्तु भागं द्वादशकं यदा॥
चन्द्रमा: स्यात्तदा राम तिथिरित्यभिधीयते॥*॥
सा दैवकृत्ये पूर्व्वाह्नयुता ग्राह्या। एकादश्युपवासातिरिक्तस्थले सर्व्वत्र त्रिसन्ध्यव्यापिनी ग्राह्या॥*॥

अथ प्रतिपत्।
सा च कृष्णा द्वितीयायुता ग्राह्या शुक्ला अमावस्यायुता ग्राह्या कृष्णाप्युपवासे द्वितीयायुता न ग्राह्या। अत्र तैलाभ्यङ्गं कुष्माण्डभक्षणं चौरञ्च न कार्य्यम्॥*॥

अथ द्वितीया।
सा च कृष्णा पूर्व्वयुता शुक्ला परयुता ग्राह्या। भ्रातृद्वितीया तु अष्टधाविभक्तदिनपञ्चमांशयुता ग्राह्या उभयदिने तल्लाभे परयुता ग्राह्या। तत्र बृहतीभक्षणं न कार्य्यम्॥*॥

अथ तृतीया।
सा च रम्भाव्रतेतरदैवकार्य्येषु चतुर्थीयुता ग्राह्या रम्भाव्रते तु द्वितीयायुता। तत्र मांसभक्षणं पटोलभक्षणञ्च न कार्य्यम्॥*॥

अथ चतुर्थी।
सा च पञ्चमीयुता ग्राह्या। विनायकव्रते तृतीयायुता ग्राह्या। मङ्गलवारे शुक्ला चतुर्थी अक्षया। अत्र मूलकभक्षणं घोरं प्रदोषे अध्ययनञ्च न कार्य्यम्। भाद्रमासे चतुर्थ्यां चन्द्रो न द्रष्टव्य:। प्रमादाद्दृष्ट्वा,—
सिंह: प्रसेनमवधीत् सिंहो जाम्बवता हत:।
सुकुमारक! मा रोदीस्तव ह्येष स्यमन्तक:॥
अनेन मन्त्रेणाभिमन्त्रितं जलं पेयं आचारात् स्यमन्तकोपाख्यानञ्च श्रोतव्यम्॥*॥

अथ पञ्चमी।
सा च चतुर्थीयुता ग्राह्या अत्र विल्वं न भोक्तव्यम्॥*॥

अथ षष्ठी।
सा सप्तमीयुता ग्राह्या। स्कन्दषष्ठी तु पञ्चमीयुता ग्राह्या अस्यां शिरोऽभ्यङ्गो निम्बभक्षणञ्च न कर्त्तव्यम्॥*॥

अथ सप्तमी।
सा षष्ठीयुता ग्राह्या तत्र तालं न भक्षयेत्। शुक्लपक्षस्य सप्तम्यां यदि रविवारो भवेत् सा विजया सप्तमी। माघमासस्य शुक्लसप्तम्यां दिवाकरा रथमापु: तस्मात् सा रथसप्तमी॥ सा मन्वादिश्च। तस्यां अध्ययनं न कर्त्तव्यम्॥*॥

अथाष्टमी।
सा शुक्ला नवमीयुता ग्राह्या कृष्णा सप्तमीयुता। तत्राध्ययनं नारिकेलभक्षणञ्च न कर्त्तव्यम्॥ शनिवारे अथवा मङ्गलवारे कृष्णाष्टमी पुण्यतरा। बृहस्पतिवारे शुक्लाष्टमी अक्षया। दूर्व्वाष्टमी पूर्व्वविद्धा ग्राह्या। जन्माष्टमीव्यवस्था तच्छब्दे द्रष्टव्या॥*॥

अथ नवमी।
सा चाष्टमीयुता ग्राह्या। तत्रालाबुभक्षणं न कर्त्तव्यम्। माघस्य शुक्ला नवमी महानन्दा। रामनवमीव्यवस्था तच्छब्दे द्रष्टव्या॥*॥

अथ दशमी।
सा च शुक्ला एकादश्या कृष्णा तु नवम्या युता ग्राह्या। अत्र कलम्बीभक्षणं न कर्त्तव्यम्॥*॥ एकादशीव्यवस्था श्रीविष्णो: शयनव्यवस्था च तत्तच्छब्दे द्रष्टव्या॥*॥ अथ द्वादशी।
सा च एकादशीयुता ग्राह्या। अत्र पूतिकाभक्षणं न कर्त्तव्यम्। फाल्गुनस्य शुक्ला द्वादशी पुष्यनक्षत्रयुक्ता चेत् गोविन्दद्वादशी॥*॥

अथ त्रयोदशी।
सा च शुक्ला द्वादशीयुता कृष्णा परयुता ग्राह्या। अत्र वार्त्ताकीभक्षणं न कर्त्तव्यम्॥*॥

अथ चतुर्द्दशी।
सा शुक्ला पूर्णिमायुता कृष्णा त्रयोदशीयुता ग्राह्या। तत्र माषो न भोक्तव्य:। ज्यैष्ठकृष्णचतुर्द्दश्यां प्रदोषे सावित्रीव्रतं कर्त्तव्यम्। तत्र यदा त्रयोदशी दिवाभागे दण्डद्वयमात्रसत्त्वेऽपि चतुर्द्दशी भवेत् तद्दिने व्रतं कर्त्तव्यम्। पूर्व्वाह्ने तद्विधत्वेऽपि पराह्ने त्रिसन्ध्यव्यापित्वे पराह्न एव। यदा तु पूर्व्वापरयोर्न तथाविधा तदापि पराह्न एव। भाद्रे मासि कृष्णा चतुर्द्दशी अघोरा। माघे कृष्णा चतुर्द्दशी रटन्ती। शिवरात्रिव्यवस्था तच्छब्दे द्रष्टव्या॥*॥

अथ पौर्णमासी।
तत्र मांसं न भोक्तव्यम्। सा च चतुर्द्दशीयुता ग्राह्या। सा तु मासर्क्षयुता चेत् तदा महती। कार्त्तिकमासे कृत्तिकानक्षत्रयुता पौर्णमासी महाकार्त्तिकी एवमन्यत्रापि। महाज्यैष्ठीव्यवस्था तच्छब्दे द्रष्टव्या। कोजागरव्यवस्था तच्छब्दे द्रष्टव्या॥*॥ अथामावस्या।
अत्र मांसं न भोक्तव्यम्। सा प्रतिपद्युता ग्राह्या। मङ्गलवारे यदि अमावस्या भवेत् तदा अरुणोदयमारभ्य मौनी भूत्वा यो गङ्गायां स्नायात् स सहस्रगोदानजन्यफलमाप्नुयात्। अमावस्याश्राद्धव्यवस्था श्राद्धशब्दे द्रष्टव्या। पौषमाघयोरमावास्या यदि दिवारविवारव्यतीपात-श्रवणनक्षत्रयुक्ता भवति तदा अर्द्धोदययोग: स्यात्। अयं कोटिसूर्य्यग्रहतुल्य: अत्र तावज्जलं गङ्गोदकतुल्यं यत्किञ्चिद्दानं मेरुसन्निभञ्च भवति। इति तिथ्यादितत्त्वम्॥ तिथिकृत्यं मासशब्दे द्रष्टव्यम्॥

तिथिक्षय:, पुं, (तिथीनां तिथ्युपलक्षितचन्द्रकलानां क्षयो यत्र।) अमावस्या। इति शब्दार्थकल्पतरु:॥ दिनक्षय:। त्र्यहस्पर्श:। यथा,—
"एकस्मिन् सावने त्वह्नि तिथीनां त्रितयं यदा।
तदा दिनक्षय: प्रोक्तस्तत्र साहस्रिकं फलम्॥"
अपिच।
"शतमिन्दुक्षये पुण्यं सहस्रन्तु दिनक्षये॥"
इति तिथ्यादितत्त्वम्॥

तिथिप्रणी:, पुं, (तिथिं प्रणयति ह्रासवृद्धिरूपकलाक्रिययेति। प्र+नी+क्विप् णत्वञ्च।) चन्द्र:। इति हेमचन्द्र:। २। १८॥

तिथी, स्त्री, (तिथि:। कृदिकारादिति वा ङीष्।) तिथि:। इति भरत:॥ (यथा, महाभारते। १३। ८७। १८।
"कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्द्दशीम्।
श्राद्धकर्म्मणि तिथ्यस्तु प्रशस्ता न तथेतरा:॥")

तिनाशक:, पुं, (तिनिश एव। स्वार्थे कन्। पृषोदरादित्वात् आत्वम्।) तिनिशवृक्ष:। इति शब्दरत्नावली॥

तिनिश:, पुं, (अतिशयेन नेशतीति। निश समाधौ+"इगुपधेति।" ३। १। १३५। इति क:। यद्वा, अतिक्रान्तो निशा: अत्यादय इति समास:। पृषोदरादित्वात् साधु:।) वृक्षविशेष:। मथुरादौ तिनाश इति ख्यात:। कुत्रचित् सादन इति ख्यातश्च। तत्पर्य्याय:। स्यन्दन: २ नेमी ३ रथद्रु: ४ अतिमुक्तक: ५ वञ्जुल: ६ चित्रकृत् ७। इत्यमर:। २।४।२६॥ चक्री ८ शताङ्ग: ९ शकट: १० रथ: ११ रथिक: १२ भस्मगर्भ: १३ मेषी १४ जलधर:१५। (यथा, सुश्रुते चिकित्सितस्थाने। १६।
"शल्लकीवदरीविल्वपलाशतिनिशत्वच:॥")
अस्य गुणा:। कषायत्वम्। उष्णत्वम्। कफरक्तातीसारवातामयनाशित्वम्। ग्राहकत्वम्। दाहजनकत्वञ्च। इति राजनिर्घण्ट:॥

तिन्तिड:, पुं, (तिम्यते क्लिद्यते मुखाद्यनेनेति। तिम+ईकन्प्रत्ययेन तिन्तिड़ीक:। तत: पृषोदरादित्वात् साधु:।) चिञ्चा। वृक्षाम्ल:। इति विश्व:॥ दैत्यभेद:। इति हेमचन्द्र:॥

तिन्तिड़िका, स्त्री, (तिन्तिड़ी+स्वार्थे कन्। टाप् पूर्व्वह्रस्वश्च।) तिन्तिड़ी। इति शब्दरत्नावली॥

तिन्तिड़ी, स्त्री, (तिम्यते क्लिद्यते मुखाभ्यन्तरमनेनेति। तिम+ईकन्प्रत्ययेन तिन्तिड़ीका। तत: पृषोदरादित्वात् साधु:।) वृक्षविशेष:। तेँतुल् इति भाषा॥ तत्पर्य्याय:। चिञ्चा २ अम्लिका ३। इत्यमर:। २। ४। ४३॥ तिन्तिड़ीक: ४ तिन्तिड़ीकम् ५ तिन्तिड़ीका ६ अम्लीका ७ आम्लिका ८ चाम्लीका ९। दास तट्टीका॥ तिन्तली १० तिन्तिड़िका ११ आन्दिका १२ चुक: १३ चुका १४ चुक्रिका १५ अम्ला १६ नत्यम्ला १७ सक्ता १८ सक्तिका १९ चारिघा २० गुरुपत्रा २१ चिञ्चिहला २२ यमदूतिका २३। इति शब्दरत्नावली॥ शाकचुक्रिका २४ सुचुक्रिका २५ सुतिन्तिड़ी २६। अस्या आमफलस्य गुणा:। अत्यम्लत्वम्। कफपित्तकारित्वञ्च। इति राजनिर्घण्ट:॥ वातनाशित्वम्। अस्या: पक्वफलस्य गुणा:। दीपनत्वम्। रुचिकारित्वम्। भेदित्वम्। उष्णत्वम्। कफवातनाशित्वञ्च। इति राजवल्लभ:॥ विष्टम्भनाशित्वम्। मधुराम्लत्वम्। पित्तदाहास-